# आदर्शप्रश्नपत्रम्

(अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् प्रश्नाः भविष्यन्ति । अतः छात्राः पाठ्यक्रमानुगुणम् अध्ययनं कुर्युः ।)

## राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः

### विद्यावारिधिः

**शास्त्रम्/विषयः – वेदभाष्यम्** **पूर्णाङ्काः 100**

**(अस्मिन् प्रश्नपत्रे भागद्वयं भविष्यति । प्रत्येकस्मिन् भागे 50 बहुविकल्पीयाः एकाङ्कीयाः प्रश्नाः भविष्यन्ति ।)**

**प्रथमभागः - अनुसन्धानम् - 50 अङ्काः**

**द्वितीयभागः - वेदभाष्यम् - 50 अङ्काः**

**प्रथमभागः- अनुसन्धानम् - 50 अङ्काः**

1. संस्कृतभाषासाहित्यक्षेत्रे अनुसन्धानस्य का प्रमुखावश्यकता स्यात् ?

   A प्राचीनभारतीयसंस्कृतेः सभ्यतायाश्च प्रतिष्ठा

   B संस्कृतशास्त्राणां मौलिकज्ञानवितरणम्

   C संस्कृतशास्त्राणां संरक्षणम्

   D संस्कृतशास्त्राणां सामाजिकसमस्यानिवारणायोपयोगः

2. प्राचीनानुसन्धातृमुनिषु वागायुर्योगवेत्ता कः ?

   A वराहमिहिरः B ब्रह्मगुप्तः

   C पतञ्जलिः D कालिदासः

3. अधोलिखितेषु अनुसन्धानस्य प्रकृष्टं लक्षणं किं स्यात् ?

A अनुपलब्धवस्तुनां लोकलोचनगोचरीकरणम्

B समुपलब्धानां तथ्यानां नवीनरूपेण नूतनसिद्धान्तैः उपस्थापनम्

C समस्यायाः सिद्धान्तैस्सह निवारणम्

D एतत्सर्वम्

4. विषयनिर्वाचने समुचितसामग्र्यभावात् शोधः कीदृशः भवितुमर्हति

A सफलः B असम्पूर्णः भ्रमात्मको वा

C विलक्षणः D समाजोपयोगी

5. समीक्षकस्य हाल् महोदयस्य मतानुसारेण मातृकाषु भ्रमाः कतिविधाः भवन्ति -?

A द्विविधाः B त्रिविधाः

C चतुर्विधाः D बहुविधाः

6. राष्ट्रस्य अतीतां घटनां, साहित्यं, संस्कृतिं वा समाश्रित्य नूतनतया क्रियमाणमनुसन्धानं केन नाम्ना परिचितम् ?

A क्रियात्मकमनुसन्धानम् B ऐतिहासिकमनुसन्धानम्

C व्याख्यात्मकमनुसन्धानम् D किमपि न

7. व्याख्यात्मकः शोधः कीदृशः भवति ?

A विश्लेषणात्मकः B प्रयोगात्मकः

C तुलनात्मकः D सम्पादनात्मकः

8. अनुसन्धाननिमित्तमिदमपेक्षितम् -

A क्रमबद्धयोजनानिर्माणम् B मार्गदर्शनप्रदानम्

C आर्थिकमायोजनम् D पुस्तकालये उपवेशनम्

9. राष्ट्रियपाण्डुलिपिसंस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये B तमसो मा ज्योतिर्गमय

C विज्ञानमुपास्व D मातृका रक्षत

10 भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च इति कीदृशम् अनुसन्धानं भवितुमर्हति ?

A सर्वेक्षणम् B शास्त्रीयम्

C तुलनात्मकम् D क्षेत्रीयम्

11. "Research is a careful, systematic and objective investigation conducted to obtain valid facts, draw conclusions and established principles regarding an identifiable problem in some field of knowledge." इति केन वैदेशिकेनोक्तम् ?

A Clarke and Clarke B Clifford Woody

C John W. Best D Martyn Shuttle Worth

12. पाठभेदादिसमीक्षा कदा क्रियते ?

A मातृकासम्पादने B आलङ्कारिकपर्यालोचनायाम्

C ग्रन्थकृदः व्यक्तित्वकृतित्वविचारे D दार्शनिकपरिशीलने

13. मातृकायाम् उल्लिखिता "ग्रहर्षिवियच्चन्द्राः" इति पङ्क्तिः कां संख्यां बोधयति ?

A 1079 B 1879

C 1179 D 6179

14. अनुसन्धाने विषयचयनसन्दर्भे किं न द्रष्टव्यम् ?

A अनुसन्धातुः बोधनक्षमता B अनुसन्धातुः विषयं प्रति प्रीतिः

C विषयं प्रति पाठकानामभिरुचिः D विषयं प्रति परेषां निन्दनम्

15. अन्तर्जाले अधोलिखितेषु किं Internet Searching Tool रूपेण नोपयुज्यते ?

A Google B Yahoo

C Bing D Whatsapp

16. महस्विनी" इति शोधपत्रिका कया संस्थया प्रकाश्यते ?

A तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन

B केन्द्रीयसंस्कृतिविश्वविद्यालयस्य राजीवगान्धिपरिसरेण

C श्रीजगन्नाथसंस्कृतविश्वविद्यालयेन

D सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन

17. अखिलभारतप्राच्यविद्यासम्मेलनं कया संस्थया क्रियते ?

A केन्द्रमानवसंवलविकासमन्त्रालयेन

B भण्डारकरप्राच्यविद्याऽनुसन्धानकेन्द्रेण

C सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन

D सिण्डिआप्राच्यविद्याकेन्द्रेण-

18. "Oriental Research Institute (ORI) " कुत्र वर्तते ?

A केरले B ताञ्जावूरे

C मैशूरे D पुनेनगरे

19. भण्डारकरप्राच्यविद्यागवेषणाकेन्द्रात् प्रकाशितस्य महाभारतग्रन्थस्य सम्पादनायाम् अयं नास्ति ?

A सूक्तङ्करः B वेल्वल्करः

C दाण्डेकरः D पि काणे.वि.

20 National Manuscript Mission इति संस्थायाः प्रकाशनेषु एतन्नास्ति –

A कृतिबोधः B समीक्षिका

C तत्त्वबोधः D संस्कृतप्रतिभा

**सङ्गणकाधारितायां प्रवेशपरीक्षायाम् उपरि प्रदत्तप्रश्नानुगुणं प्रथमभागे अनुसन्धानविषयात् आहत्य 50 प्रश्नाः भविष्यन्ति। द्वितीयभागे आवेदितशास्त्रानुगणं / विषयानुगुणं 50 प्रश्नाः भविष्यन्ति।**

**विषयः - वेदभाष्यम्** **पूर्णाङ्काः -100**

51. 'यत्रार्थवशेन पादव्यवस्था' इति कस्य वेदस्य लक्षणम्?

A ऋक् B साम

C यजुः D अथर्व

52. 'विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः' इति वेदलक्षणं कुत्र वर्त्तते?

A निरुक्ते B सामविधानब्राह्मणे

C वह्वक्प्रातिशाख्ये D छान्दग्योपनिषदि

53. 'शतर्चिन आद्ये मण्डलेऽन्त्ये क्षुद्रसूक्तमहासूक्तामध्यमेषु माध्यमाः' इति कस्योक्तिः? A शौनकस्य B शाकलस्य

C यास्कस्य D कात्यायनस्य

54. 'मोघमन्नं विन्दते अप्रचेताः' इत्यत्र 'मोघं' नाम किम्?

A रसः B पापम्

C अमृतम् D तेजः

55. ऋग्वेदस्य चतुर्थमण्डलस्य ऋषिः कः?

A भरद्वाजः B वसिष्ठः

C अत्रिः D वामदेवः

56. शुनःशेपोपाख्यानं कस्मिन् ब्राह्मणे विद्यते?

A शतपथब्राह्मणे B कौषीतकिब्राह्मणे

C वंशब्राह्मणे D ऐतरेयब्राह्मणे

57. आधानं कतिविधम्?

A द्विविधम् B त्रिविधम्

C चतुर्विधम् D पञ्चविधम्

58. ‘ताभ्यामुत्पुनाति’ इत्यत्र का क्रिया ?

A परिस्तरणम् B प्रक्षेपणम्

C उत्पवनम् D ताडनम्

59. पार्थिवाः सम्भाराः कति ?

A सप्त B अष्टौ

C नव D एकादश

60. ‘अभ्रि’ केन काष्ठेन निर्मियते?

A खादिर B वारण

C अश्वत्थ D विङ्ककत

61. कपालानि केन निर्मितानि ?

A मृदा B काष्ठेन

C कांस्येन D ताम्रेण

62. इष्टौ कति ऋत्विजः ?

A पञ्च B चत्वारः

C षट् D नव

63. आहवनीयस्वरूपम् ?

A वृत्तम् B त्रिकोणम्

C चतुरस्रम् D अर्धचन्द्राकारः

64. ‘निषादस्थपतिर्गावेधुकेऽधिकृतः’ इति सूत्रस्थे निषादस्थपतिशब्दे कः समासः स्वीकृतः ?

A तत्पुरुषः B बहुव्रीहिः

C द्वन्द्वः D कर्मधारयः

65. अवकीर्णिनः कस्मिन् अग्नौ अधिकारः ?

A आहवनीयाग्नौ B लौकिकाग्नौ

C गार्हपत्याग्नौ D सभ्याग्नौ

66. पत्नीसन्नहनं केन ?

A स्रुवेण B वस्त्रेण

C योक्त्रेण D पयसा

67. आप्तोर्यामसंस्था कस्ययागस्य विकृतिभूता ?

A वाजपेयस्य B अतिरात्रस्य

C अत्यग्निष्टोमस्य D उक्थ्यस्य

68. चयनं कुत्र क्रियते ?

A परिधौ B उत्तरवेद्याम्

C हविर्धानमण्डपे D मार्गे

69. 'पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे' इत्यत्र किं निरुपितम् ?

A मन्त्रभेदाः B मन्त्रस्वरूपम्

C मन्त्रस्यावश्यकता D मन्त्रलक्षणम्

70. 'अथापीदमन्तरेण पद-विभागो न विद्यते' इत्यत्र कस्यशास्त्रस्य निर्देशः ?

A व्याकरणस्य B न्यायस्य

C निरुक्तस्य D वेदान्तस्य

71. उखासंभरणविषयः काण्वसंहितायाः कस्मिन्नध्याये वर्त्तते ?

A दशमे B द्वादशे

C चतुर्द्दशे D षोडशे

72. लोकभागेष्टकाः कति ?

A त्रिंशत् B चत्वारिंशत्

C पञ्चाशत् D षष्ठिः

73. नमस्ते रुद्र मन्यव.................' इति मन्त्रे 'मन्युः' इत्यस्य कोऽर्थः ?

A सुखम् B क्रोधः

C आयुधः D रयिः

74. वेदभाष्यकार-अनन्ताचार्यस्य कालः कः ?

A त्रयोदशशतकम् B चतुर्द्दशशतकम्

C पञ्चदशशतकम् D षोडशशतकम्

75. 'शतं वो अम्ब धामानि सहस्रमुत वो रुहः' इति मन्त्रे 'अम्ब' इति सम्बोधनं कस्य ?

A मातुः B वनस्पतीनाम्

C ओषधीनाम्    D गोः

**एवं क्रमेण द्वितीयभागे आवेदितशास्त्रानुगणं / विषयानुगुणं 50 प्रश्नाः भविष्यन्ति ।**

******